वचागारप्रवेशो जीर्णौषधस्यापराह्णे हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टिकानां च पयसा शर्करामधुरेणौदनमश्नीयादेवं षण्मासानुपयुज्य विगतपाप्मा बलवर्णोपेतः श्रुतिनिगादी स्मृतिमानरोगो वर्षशतायुर्भवति । कुष्ठिनं पाण्डुरोगिणमुदरिणं वा कृष्णाया गोर्मूत्रेणालोड्यार्द्धपलिकं पिण्डं विगतलौहित्ये सवितरि पाययेत, अपराह्णे चालवणेनामलकयूषेण सर्पिष्मन्तमोदनमश्नीयात् । एवं मासमुपयुज्य स्मृतिमानरोगो वर्षशतायुर्भवति एष एवोपयोगश्चित्रकमूलानां, रजन्याश्चित्रकमूले विशेषो द्विपलिकं पिण्डं परं प्रमाणं शेषं पूर्ववत् ।

हृतदोष एव प्रतिसंसृष्टभक्तो यथाक्रममागारं प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलं पयसालोड्य पिबेत् पयोऽनुपानं वा तस्यां जीर्णायां यवान्नं पयसोपयुञ्जीत तिलैर्वा सह भक्षयित्वा त्रीन्मासान् पयोऽनुपानं जीर्णे पयः सर्पिरोदन इत्याहारः । एवमुपयुञ्जानः ब्रह्मवर्चसी श्रुतनिगादी भवति वर्षशतमायुरवाप्नोति त्रिरात्रोपोषितश्च त्रिरात्रमेनां भक्षयेत् । त्रिरात्रादूर्द्ध्वं पयःसर्पिरिति चोपयुञ्जीत । विल्वमात्रं पिण्डं वा पयसालोड्य पिबेदेवं दशरात्रमुपयुज्य मेधावी वर्षशतायुर्भवति । हृतदोष एवागारं प्रविश्य प्रतिसंसृष्टभक्तो ब्राह्मीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलमुपयुञ्जीत जीर्णौषधश्चापराह्णे यवागूमलवणां पिबेत् क्षीरसात्म्यो वा पयसा भुञ्जीत । एवं सप्तरात्रमुपयुज्य ब्रह्मवर्चसी मेधावी भवति । द्वितीयं सप्तरात्रमुपयुज्य ग्रन्थमीप्सितमुत्पादयति । नष्टञ्चास्य प्रादुर्भवति । तृतीयं सप्तरात्रमुपयुज्य द्विरुच्चारितं शतमप्यवधारयति । एवमेकविंशतिरात्रमुपयुज्यालक्ष्मीरपक्रामति मूर्त्तिमती चैनं वाग्देव्यनुप्रविशति सर्वाश्चैनं श्रुतय उपतिष्ठन्ति । श्रुतधरः पञ्चवर्षशतायुर्भवति । ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं विड़ङ्गतण्डुलानां कुडवं द्वे द्वे पले वचात्रिवृतयोर्द्वादश हरीतक्यामलकविभीतकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा स्वनुगुप्तं निदध्यात् । ततः पूर्वविधानेन मात्रां यथाबलमुपयुञ्जीत जीर्णे पयःसर्पिरोदन इत्याहारः । एतेनोर्द्धमधस्तिर्य्यक् कृमयो निःक्रामन्ति अलक्ष्मीरपक्रामति । पुष्करकर्णः स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवत्येतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतग्रहेष्वन्येषु च महाव्याधिषु च संशोधनमादिशन्ति । हृतदोष एवागारं प्रविश्य हैमवत्या वचायाः पिण्डमामलकमात्रमभिहुतं पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदन इत्याहारः । एवन्द्वादशरात्रमुपयुञ्जीत ततोऽस्य श्रोत्रं विव्रियते द्विरभ्यासात् स्मृतिमान् भवति त्रिरभ्यासाच्छ्रुतमादत्ते चतुर्द्वादशरात्रमुपयुज्य सर्व्वं तरति किल्विषं तार्क्ष्यदर्शनमुत्पद्यते शतायुश्च भवति । द्वे द्वे पले इतरस्या वचाया निःक्वाथ्य पिबेत् पयसा समानं भोजनं समाः पूर्व्वेणाशिषश्च । वचाशतपाकं वा सर्पिर्द्रोणमुपयुज्य पञ्चवर्षशतायुर्भवति गलगण्डापचीश्लीपदस्वरभेदांश्चापहन्तीति ।

अथायुःकामीयं वक्ष्यामः । मन्त्रौषधसमायुक्तं संवत्सरफलप्रदम् । विल्वस्य चूर्णं पुष्ये तु हुतं वारान् सहस्रशः । श्रीसूक्तेन नरः कल्ये ससुवर्णं दिने दिने । सर्पिर्मधुयुतं लिह्यादलक्ष्मीनाशनं परम् । त्वचं विल्वस्य मूलस्य मूलक्वाथं दिने दिने । प्राश्नीयात् पयसा सार्द्धं स्नात्वा हुत्वा समाहितः । दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत् । हुत्वा त्रिशालाक्वाथन्तु मधुलाजैश्च संयुतम् । अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतम् । सुवर्णपद्मवीजानि मधुलाजाः प्रियङ्गवः । गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत् । नीलोत्पलदलक्वाथो गव्येन पयसा शृतः । ससुवर्णतिलैः सार्द्धमलक्ष्मीनाशनः स्मृतः । गव्यं पयः सुवर्णञ्च मधूच्छिष्टञ्च माक्षिकम् । पीतं शतसहस्राभिहुतं युक्तरथं स्मृतम् । वचाष्टमसुवर्णञ्च विल्वचूर्णमिति त्रयम् । मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्द्धनम् । वासामूलतुलाक्वाथे तैलमावाप्य साधितम् । हुत्वा सहस्रमश्नीयान्मेधाग्र्यमायुष्यमुच्यते । यावकांस्तावकान्भक्षेदभिभूय यवांस्तथा । पिप्पलीमधुसंयुक्तान् भिक्षाचरणवद्भवेत् । मध्वामलकचूर्णानि सुवर्णमिति च त्रयम् । प्राश्यारिष्टगृहीतोऽपि मुच्यते प्राणसंशयात् । शतावरीघृतं सम्यगुपयुक्तं दिने दिने । सक्षौद्रं ससुवर्णं च नरेन्द्रं स्थापयेद्वशे । गोचन्दनामोहनिकामधूकं माक्षिकं मधु । सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता । पद्मनीलोत्पलक्वाथे यष्टीमधुकसंयुते । सर्पिरासादितं गव्यं ससुवर्णं सदा पिबेत् । पयसानुपिबेत् सिद्धं तेषामेव समुद्भवे । अलक्ष्मीघ्नं सदायुष्यं राज्याय सुभगाय च । यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने । शब्दिता तत्र सर्व्वत्र गायत्री त्रिपदी भवेत् । पाप्मानं नाशयन्त्येता दद्युश्चौषधयः श्रियम् । कुर्य्युर्नागबलं चापि मनुष्यमजरोपमम् । सतताध्ययनं वादः परतन्त्रावलोकनम् । तद्विद्याचार्य्यसेवा च बुद्धिमेधाकरो गणः । आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधा-